रुद्राभिषेकस्तोत्रम् महाभारतान्तर्गतम्

{॥ रुद्राभिषेकस्तोत्रम् महाभारतान्तर्गतम् ॥}

कृष्णार्जुनावूचतुः ।

नमो भवाय शर्वाय रुद्राय वरदाय च ।

पशूनां पतये नित्यमुग्राय च कपर्दिने ॥ ५.८०.५५॥

महादेवाय भीमाय त्र्यम्बकाय च शान्तये ।

ईशानाय मखघ्नाय नमोऽस्त्वन्धकघातिने ॥ ५.८०.५६॥

कुमारगुरवे तुभ्यं नीलग्रीवाय वेधसे ।

पिनाकिने हविष्याय सत्याय विभवे सदा ॥ ५.८०.५७॥

विलोहिताय ध्रूम्राय व्याधायानपराजिते ।

नित्यं नीलशिखण्डाय शूलिने दिव्यचक्षुषे ॥ ५.८०.५८॥

होत्रे पोत्रे त्रिनेत्राय व्याधाय वसुरेतसे ।

अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुताय च ॥ ५.८०.५९॥

वृषध्वजाय मुण्डाय जटिने ब्रह्मचारिणे ।

तप्यमानाय सलिले ब्रह्मण्यायाजिताय च ॥ ५.८०.६०॥

विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते ।

नमोनमस्ते सेव्याय भूतानां प्रभवे सदा ॥ ५.८०.६१॥

ब्रह्मवक्त्राय सर्वाय शंकराय शिवाय च ।

नमोस्तु वाचस्पतये प्रजानां पतये नमः ॥ ५.८०.६२॥

अभिगम्याय काम्याय स्तुत्यायार्याय सर्वदा ।

नमोऽस्तु देवदेवाय महाभूतधराय च ।

नमो विश्वस्य पतये पत्तीनां पतये नमः ॥ ५.८०.६३॥

नमो विश्वस्य पतये महतां पतये नमः ।

नमः सहस्रशिरसे सहस्रभुजमृत्यवे॥

सहस्रनेत्रपादाय नमोऽसङ्ख्येयकर्मणे । ५.८०.६४॥

नमो हिरण्यवर्णाय हिरण्यकवचाय च ।

भक्तानुकम्पिने नित्यं सिध्यतां नो वरः प्रभो ॥ ५.८०.६५॥

सञ्जय उवाच ।

एवं स्तुत्वा महादेवं वासुदेवः सहार्जुनः ।

प्रसादयामास भवं तदा ह्यस्त्रोपलब्धये ॥ ५.८०.६६॥

॥ इति श्रीमन्महाभारते द्रोणपर्वणि प्रतिज्ञापर्वणि

अर्जुनस्वप्ने अशीतितमोऽध्यायः ॥ ८० ॥

Similar stotra is also found in matsyapurANa adhyAya 132

See sa.wikisource.org

The Kinjavadekar's Mahabharata edition does not include 80.63.

Proofread by Sunder Hattangadi sunderh at hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Rudrabhisheka Stotram Lyrics in Devanagari PDF
% File name : rudrAbhiShekastotra.itx
% Location : doc_shiva
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Proofread by : Sunder Hattangadi sunderh at hotmail.com
% Latest update : March 10, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built

the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website